# संस्कृतम्

**( अनिवार्यम् )**

| समयः होरात्रयम् (घण्टा-त्रयम्) | पूर्णाङ्काः 300 |
|---|---|

**प्रश्नपत्रविषये विशेषनिर्देशाः**

**प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः**

सर्वेऽपि प्रश्नाः समाधेयाः।

प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः।

यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि संस्कृतभाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि।

यत्रापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव। उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघुतराणि वा भवेयुः तदा अङ्कहानिः भविष्यति।

प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। नोचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत्।

# SANSKRIT

**( Compulsory )**

| Time Allowed : Three Hours | Maximum Marks : 300 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

1. अधोलिखितेषु विषयेषु कमपि एकं विषयमधिकृत्य षट्शत-शब्दैः (600 परिमितशब्दैः) निबन्धो लेखनीयः — 100

(a) भारतवर्षे स्वास्थ्यसेवानां स्थितिः

(b) भारतीय-कृषक-नीतिः, 2020 इत्यस्य सार्थकता

(c) राष्ट्रिय-शिक्षानीतेः (2020) समक्षं समाह्वानानि

(d) वर्तमानकाले कृत्रिमबुद्धेः (AI) उपयोगिता

2. अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारं तदधस्ताद् प्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया संक्षेपतश्च स्वगिरा साधु दीयताम्— 12×5=60

जीवनं पर्यावरणं च परस्परं गभीरं संबद्धे स्तः। सर्वेषां सजीव-वस्तूनां जीवनं अतिशयं पर्यावरणाधीनः। अतः अस्माकं मनः-कायः-शक्तिः-सामर्थ्यः अनन्य विशेषता च सम्पूर्णेन पर्यावरणेन संगठिता परिपुष्टाः विकसन्ति च। नूनं जीवनं पर्यावरणं च परस्परं तथा संबद्धे स्तः, यथा द्वयोः सह-अस्तित्वम् अत्यन्तम् आवश्यकम् अस्ति।

पर्यावरणम् अस्माकं रक्षा-कवचमस्ति यत् प्रकृतिः परम्परातः अस्मभ्यं यच्छति। इदम् अस्माकं पालनकर्तृ जीवनाधारश्च वर्तते।

पर्यावरणं मूलतः प्रकृते अवदानम् अस्ति। इयं पृथ्वी वन-पर्वतैः, प्रवहण-नद-निर्झरैः, मरुस्थलैः-उन्मुक्तक्षेत्रैः, तृणवनैः, चित्र-विचित्र-पशु-पक्षिभिः, स्वच्छजलेन पूरितैः, तरङ्गपूर्णैः ह्रद-सरोवरैः पूर्णा अस्ति। एतैः सह वहन् शीतलः, मंदः, गन्धवाहः वायुः, उद्गच्छन्तः, पीयूषधारावर्षिणः मेघाः प्रकृतेः अंगाः —एते सर्वे पृथिवीवासिनां विकासार्थं सुख-समृद्ध्यर्थं च एकस्य संतुलितस्य पर्यावरणस्य निर्माणं कुर्वन्ति। किन्तु पर्यावरणस्य इदं प्राकृतिकं संतुलनम् अद्य अति-त्वरितगत्या बाध्यमानम् अस्ति। इदम् आश्चर्यकरं यत् मानवः पृथिव्याः एतेषां स्रोतसां निरङ्कुशं दोहने प्रवृत्तः अस्ति। अद्य स अस्य वरदानानां तथा-भूतम् अविवेकपूर्णं दुरुपयोगं करोति यथा समस्तमपि प्रकृतितन्त्रं दोलायमानं जातम् अस्ति। एवं प्रतीयते यद् इदानीं तद् दिनं बहुदूरं नास्ति यदा शतशः-प्राचीनं हिमयुगं पुनरावर्तेत अथवा ध्रुवेषु संलग्ना हिमस्य स्थूलांशानां विगलनात् सागरस्य प्रलयङ्कारिण्यः भीषणकल्लोलाः नगराणि वन-पर्वतान् जीव-जन्तून् च भक्षयेयुः।

इदं तु निश्चितमस्ति यत् एवं पर्यावरणं विकृतं दूषितं च कुर्वन्त्यः सर्वाः इमाः विपदाः अस्माभिः स्वयमेव आनीताः, वयं स्वयं च प्रकृतेः संतुलनं विकृतं कुर्वाणाः स्म। अस्मादेव असंतुलनाद् भूमेः वायोः जलस्य ध्वनेश्च प्रदूषणानि उत्पद्यन्ते। पर्यावरणप्रदूषणेन फुफ्फुससम्बन्धिनः हृदयसम्बन्धिनः उदरसम्बन्धिनः दृष्टिसम्बन्धिनः श्रवणसम्बन्धिनः मानसिक अस्थिरताः सम्बन्धिनश्च रोगाः प्रभवन्तः सन्ति। वयं सर्वे जानीम यत् मानवानां जीवनधारणार्थं जीवन-प्रकृत्योः समुचितं संतुलनम् अपरिहार्यम्।

नूनं पृथिवी वनस्पतिभिः पूर्णरूपेण आच्छादिता न स्यात्, एतदर्थं ग्रासचराः पशवः पर्याप्तसंख्यायाम् आसन्। एतेषां ग्रासचराणां पशूनां संख्यां सीमितां संतुलितां च स्याद् इत्येतदर्थं हिंस्रप्राणिनः अपि आसन्। अतः एतेषां त्रयाणाम् अनुपातः संतुलितः नियंत्रितः च भवेयुः। आधुनिकयुगे वैज्ञानिकाविष्काराणाम्, उद्योगकर्मणां विकासेन विस्तरेण च सहैव जनसंख्यायाः भयङ्करः विस्फोटः अपि विद्यमानाः।

(a) अस्य कथनस्य आशयं स्पष्टीकुरुत—"जीवनं पर्यावरणं च परस्परं गभीरं संबद्धे स्तः"।

(b) पर्यावरणस्य प्रकृतेः च मध्ये कः सम्बन्धः स्वीकृतः अस्ति?

(c) प्रकृतिः संतुलितपर्यावरणस्य निर्माणं कथं करोति?

(d) पर्यावरण-असंतुलनेन अस्माकं जीवने का हानिः जायते?

(e) पर्यावरण-प्रदूषणेन अस्माकं जीवने के के रोगाः उत्पद्यमानाः सन्ति?

**3.** अधस्तनगद्यभागस्य संक्षेपः मूलभागस्य तृतीयांशपरिमितो स्वशब्दैरेव लेख्यः। शीर्षको न प्रदेयः — 60

भारतस्य एकता स्वतन्त्रता च एकस्यैव चित्रस्य द्वौ पक्षौ स्तः। यदि अस्माकम् एकता हस्ताद् निर्गच्छति, तर्हि स्वतन्त्रतापि द्वारम् उद्घाट्य बहिर्गमिष्यति। अतएव सर्वेषां भारतीयानाम् इदं प्राथमिकं कर्तव्यम् अस्ति यत् ते पूर्णनिष्ठया स्वकीयायाः राष्ट्रियैकतायाः रक्षां कुर्युः। भारते राष्ट्रिय-समस्यासमूहाः भाषासम्बन्धिसमस्याभ्यः अपि गुरुतरः विशालतरश्च वर्तते। एकतायाः रक्षार्थं वयम् अपमानम् अपि सोढुं शक्नुमः। एकतायाः रक्षार्थं वयम् अन्यायम् अपि सोढुं शक्नुमः। इदं सर्वम् एतदर्थं सोढव्यं यत्, यदा भारतस्य एकता पुष्टा बलवती च भविष्यति, तदा अस्माकं अपमानं कोऽपि बहिः शक्तिः कर्तुं न प्रभविष्यति। तदा देशस्य एकभागः केनापि अपरेण भागेन सह अन्यायम् अपि नैव आचरिष्यति। अद्य यदि अस्माकम् आर्थिकस्थितिः सुदृढा भवति, तर्हि अस्माकं कलहा अपि समाप्ताः भविष्यन्ति। यदि ते प्रवर्तमानाः अपि भवेयुः तदापि तेषु पूर्ववत् कटुता न स्थास्यति, यतः समृद्धिः व्यक्तेः विचारम् अपि आकारितं करोति।

एकताया रक्षायाः सहैव अस्माकम् अपरं कर्तव्यम् इदमस्ति यत् वयं भारतस्य तत् स्वरूपं परिष्कर्तुं यतामहे यस्य साकारकरणाय तद् स्वाधीनम् अभवत्। भारतस्य स्वतन्त्रतायाः त्रिसप्ततिः वर्षाणि अभवन्, परन्तु अधुना अस्माभिः नूतना आरोहा उपलब्धव्याः सन्ति। स्वाधीनता केवलं रोटिकायाः पर्यायः नास्ति। स्वाधीनता केवलं उद्योगानां स्थापनायाः योग्यता नास्ति। स्वाधीनतताया वास्तविकः अर्थः आत्मनः सा स्वतन्त्रता अस्ति, मनसः सा मुक्तिः अस्ति, यस्याः कारणात् राष्ट्रं स्वस्य व्यक्तित्वं पूर्णरूपेण अभिव्यक्तं करोति। यदि कोऽपि जनः बुभुक्षितः अस्ति, तर्हि तस्य समक्षं दर्शनविषये भाषणं व्यर्थम् अस्ति।

भारतं कोऽपि नूतनः देशः नास्ति। यस्यां भाषायां तस्य संस्कृतेः विकासोऽभवत्, सा विश्वस्य प्राचीनतमा भाषा विद्यते। यो ग्रन्थः भारतीय-सभ्यताया आदिग्रन्थरूपेण अवगम्यते, स एव ग्रन्थः मानवतायाः अपि प्राचीनतमः ग्रन्थः वर्तते। अनेकेषां वैदेशिकानाम् आक्रमणानाम् अनन्तरमपि भारतं स्वसंस्कृतेः पराङ्मुखं भवितुं तत्परो नाभवत्। नवीना औद्योगिकी अथ च वैज्ञानिकी सभ्यतापि भारतात् तस्य अतीतं विषयकं प्रेम न अपाकर्तुं न शक्नोति। सत्यं केवलं तदेव नास्ति यत् विगतेभ्यः पञ्चाशदधिकद्विशत-वर्षेभ्यः अस्माकं पुरतः उपस्थापितं क्रियते, परं तस्य ज्ञानस्यापि प्रभूततरः अंशः सत्यमस्ति, यस्य विकासः विगतषट्सहस्रवर्षेषु अभवत्। भारताय तत् नूतनं सत्यमपि वाञ्छितम् अस्ति यत् भौतिकीं समृद्धिं सम्भावयति। एवं तस्मै प्राचीनकालस्य च तत् सत्यमपि वाञ्छितम् अस्ति। भौतिक-समृद्ध्यर्थं आत्मनः हननमपि पापं मन्यते।

यदाप्रभृतिः विज्ञानस्योदयः अभवत्, संसारस्य अधिकांश-देशेषु अद्य अतीतं पराजितं वर्तमानं च विजयि अभवताम्। केवलं भारतमेव एवम्भूतः देशोऽस्ति यत्र अतीतम् अद्यापि युद्धरतम् अस्ति। अयं संग्रामः भारते दीर्घसमयात् प्रवर्तते। परं भारतस्य अतीतम् अद्यापि न दुर्बलम् अस्ति, न वा अप्रासङ्गिकम्। भारतस्य अतीतं सदैव वर्तमानं सहैव नीत्वा भाविनं कालं प्रति अग्रेसरं भवितुं अभ्यस्तमस्ति। अद्यापि तत् स्वपथि अग्रेसरमस्ति। रामकृष्णः विवेकानन्दश्च, तिलकः अरविन्दश्च—एते सर्वे महापुरुषाः अतीतस्य पक्षधराः आसन्। एते वर्तमानम् आत्मसात् कृत्वा भविष्यत्कालं प्रति अग्रेसरणम् उपदिष्टवन्तः। महात्मा गान्धिः सर्वप्रथमम् अस्माकम् अतीतस्य स्वरः आसीत्। आचार्यः विनोबा भावेऽपि अतीतस्य उपनेत्राभ्यां वर्तमानं भविष्यत् च पश्यन् आसीत्। रवीन्द्रनाथ-टैगोरः अपि नूतनोऽपि/अर्वाचीनोऽपि प्राचीनतायाः सर्वश्रेष्ठः समर्थक आसीत्। अद्यापि अस्माभिः अतीतं न त्यक्तम्। अतीतमस्माकं सर्वोत्तमः न्यासः विद्यते।

4. अधःस्थगद्यभागस्य आङ्ग्लभाषया अनुवादः कर्तव्यः — 20

इदं जीवनस्य सत्यमस्ति यत्—यदि चलनसमये भवान् सचेतनः भूत्वा न चलति, तर्हि भवतः पादौ कर्दमे गर्ते वा पतितुं शक्नुतः। इदमेव सत्यं विज्ञानस्य वर्धमानैः चरणैः सह चरितार्थं भवति। यदि वयं तस्य प्रयोगं मानवकल्याणार्थं विकासार्थं च कुर्मः तर्हि विज्ञानं वरदानं भवति। तस्य उपयोगितां कोऽपि निषेद्धुं न शक्नोति। किन्तु यदि तस्योपयोगो विध्वंसकारि-कार्येभ्यः भवति तर्हि तत् विनाशस्य कारणं भवति, अभिशापश्च भवति। अस्य विध्वंसकारिणः रूपस्य कारणादेव विज्ञानात् यानि भौतिकसुखसौविध्यानि वयम् उपलभामहे तेभ्यः मानसिकं सुखं शान्तिं च वयं प्राप्तुम् असमर्थाः भवामः। भौतिक-प्रगत्या सह मानव-जीवनम् अत्यन्तं व्यस्तं, व्यावसायिकं भौतिकतावादि च संवृत्तम् अस्ति। अतएव हेतोः विज्ञानं तस्य उपलब्धयश्च मानवम् आत्मिक-सुख-शान्तिभ्यां वञ्चितं करोति। नैतिकमूल्यानां मानवीयसम्बन्धानाञ्च ह्रासोऽभवत्। किन्तु अस्मिन् दोषः मानवस्यैवास्ति, यः अस्य दुरुपयोगं कृत्वा आत्मानमेव भीषणसङ्कटे पातयति। विशालानि संहारकाणि अस्त्राणि अस्यैव प्रमाणानि सन्ति।

यदि मानवः स्वकीयानि वैयक्तिकानि स्वार्थानि त्यक्त्वा जनहितस्य भावनया विज्ञानस्य वर्धमानानां चरणानां उपयोगं कुर्यात् तर्हि निस्संदेहं एतानि चरणानि मानवस्य प्रगत्यर्थं मङ्गलमयानि सिद्ध्यन्ति।

5. अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः — 20

One of India's greatest musicians was M. S. Subbulakshmi, affectionately known to most people as 'MS'. Her singing brought joy to millions of people not only in all parts of our country, but in other countries around the world as well. In October 1966, MS was invited to sing in the great hall of the General Assembly of the United Nations in New York, while representatives of all the member countries listened. This was one of the greatest honours ever given to any musician. For several hours MS kept that international audience spellbound with the beauty of her voice and her style of singing; when the concert was over, the entire audience stood up and clapped as a sign of their appreciation of not only the singer but of the great music that she had carried with her from an ancient land. India could not have had a better ambassador. MS was the first musician ever to be awarded the 'Bharat Ratna', India's highest civilian honour. She was the first Indian musician to receive the Ramon Magsaysay Award in 1974 with the citation reading "exacting purists acknowledge Shrimati M. S. Subbulakshmi as the leading exponent of classical and semi-classical songs in the Carnatic tradition of South India".

6. *(a)* अधोलिखितानां स्वरचितवाक्येषु प्रयोगः कार्यः — 2×5=10

*(i)* समया

*(ii)* अन्तरेण

*(iii)* सहसा

*(iv)* सार्धम्

*(v)* विना

*(b)* पदसाधनं क्रियताम्— 1×10=10

*(i)* गुरु + चतुर्थी, एकवचनम्

*(ii)* मति + द्वितीया, द्विवचनम्

*(iii)* युष्मद् + पञ्चमी, बहुवचनम्

*(iv)* लता + सप्तमी, एकवचनम्

*(v)* जगत् + प्रथमा, बहुवचनम्

*(vi)* अस् + लोट्, मध्यमपुरुषे एकवचनम्

*(vii)* पा + लङ्, उत्तमपुरुषे बहुवचनम्

*(viii)* गम् + विधिलिङ्, प्रथमपुरुषे द्विवचनम्

*(ix)* दृश् + लृट्, उत्तमपुरुषे एकवचनम्

*(x)* पच् + लट्, प्रथमपुरुषे बहुवचनम्

*(c)* समासो विधेयः, समासनाम च लेखनीयम्— 2×5=10

*(i)* मक्षिकाणाम् अभावः

*(ii)* यूपाय दारु

*(iii)* राष्ट्रस्य पतिः

*(iv)* चन्द्रः शेखरे यस्य सः

*(v)* माता च पिता च

(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि— 2×5=10

(i) मम गृहस्य परितः वृक्षाः सन्ति।

(ii) रामः सीतायाः सह विद्यालयं गच्छति।

(iii) सः दरिद्रः नेत्राभ्यां काणः अस्ति।

(iv) अहं मोदकानि रोचन्ते।

(v) ते बालका ह्यः कुत्र अगच्छम्?

★ ★ ★